# ॥ श्री नृसिंहकवचं ॥
# Shri Narsingh Kavach

॥ ॐ गण गणपतये नमः ॥

**॥ नारद उवाच ॥**

इन्द्रादिदेव वृन्देश तातेश्वर जगत्पते ।
महाविष्णोर्नृसिंहस्य कवचं ब्रुहि मे प्रभो
यस्य प्रपठनाद् विद्वान् त्रैलोक्यविजयी भवेत् ॥१॥

**॥ ब्रह्मोवाच ॥**

शृणु नारद वक्ष्यामि पुत्रश्रेष्ठ तपोघन ।
कवचं नरसिंहस्य त्रैलोक्यविजयाभिधम् ॥२॥
यस्य प्रपठनाद् वाग्मी त्रैलोक्यविजयी भवेत् ।
स्रष्ठाऽहं जगतां वत्स पठनाद्धारणाद् यतः ॥३॥

लक्ष्मीर्जगत्त्रयम् पाति संहर्ता च महेश्वरः ।
पठनाद्धारणाद्देवा बभुवुश्च दिगीश्वराः ॥४॥
ब्रह्म मन्त्रमयं वक्ष्ये भूतादिविनिवारकम् ।
यस्य प्रसादाद्दुर्वासास्त्रैलोक्यविजयी मुनिः ।
पठनाद् धारणाद् यस्य शास्ता च क्रोधभैरवः ॥५॥

त्रैलोक्यविजयस्यास्य कवचस्य प्रजापतिः ।
ऋषिश्छन्दश्च गायत्री नृसिंह देवता विभुः ।
चतुर्वर्गे च शान्तौ च विनियोगः प्रकीर्त्तितः ॥६॥

क्ष्रौं बिजं मे शिरः पातु चन्द्रवर्णो महामनुः ।
उग्रवीरं महाविष्णुं ज्वलन्तः सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्योर्मृत्युं नमाम्यहम् ॥७॥

द्वात्रिंशादक्षरो मन्त्रः मन्त्रराजः सुरद्रुमः ।

कण्ठं पातु ध्रुवम् क्ष्रौं हृद्भगवते चक्षुषी मम ॥८॥
नरसिंहाय च ज्वालामालिने पातु मस्तकम् ।
दीप्तदंष्ट्राय च तथाग्निनेत्राय च नासिकाम् ॥९॥

सर्वरक्षोघ्नाय देवाय सर्वभूतविनाशाय च ।
सर्वज्वरविनाशाय दह दह पच द्वयम् ॥१०॥
रक्ष रक्ष सर्वमन्त्रम् स्वाहा पातु मुखं मम ।
तारादि रामचन्द्राय नमः पायाद्गूह्यं मम ॥११॥

क्लीं पायात्पाणियुग्मंश्च तक्रम् नमः पदम् ततः ।
नरायणाऽप्रसवम् च आं ह्रीं क्रौं क्ष्रौं चं हुं फट् ॥१२॥
षडक्षरः कटिं पातु ॐ नमो भगवते पदम् ।
वासुदेवाय च पृष्ठं क्लीं कृष्णाय उरुद्वयम् ॥१३॥

क्लीं कृष्णाय सदा पातु जानुनी च मनूत्तमः ।
क्लीं ग्लौं क्लीं श्यामलाङ्गाय नमः पायात्पदद्वयम् ॥१४॥
क्ष्रौं नरसिंहाय क्ष्रौंश्च सर्वाङ्गं मे सदाऽवतु ॥१५॥

इति ते कथितं वत्स सर्वमन्त्रौघ विग्रहम् ।
तवस्नेहान्मया ख्यातं प्रवक्तव्यं न कस्यचित् ॥१६॥
गुरुपूजा विधायाथ गृहणीयात् कवचं ततः ।
सर्वपुण्ययुतो भूत्वा सर्वसिद्धियुतो भवेत् ॥१७॥

शतमष्टोत्तरं चैव पुरश्चर्याविधि स्मृतः ।
हवनादीन् दशांशेन कृत्वा साधकसत्तमः ॥१८॥
ततस्तु सिद्ध कवचः पुण्यात्मा मदनोपमः ।
स्पर्द्धामुद्धय भवने लक्ष्मीर्वाणी वसेत् ततः ॥१९॥

पुष्पाञ्जल्याष्टकम् दत्वामूले नैव पठेत् सकृत् ।
अपि वर्षसहस्राणाम् पूजायाः फलमाप्नुयात् ॥२०॥
भूर्जे विलिख्य गुटिकाम् स्वर्णस्थाम् धारयेत् यदि ।

कण्ठे वा दक्षिणे बाहौ नरसिंहो भवेत् स्वयम् ॥२१॥

योषिद्वामभुजे चैव पुरुषो दक्षिणे करे ।
विभृयात् कवचं पुण्यम् सर्वसिद्धियुतो भवेत् ॥२२॥
काकबन्ध्या च या नारी मृतवत्सा च या भवेत् ।
जन्मबन्ध्या नष्टपुत्रा बहुपुत्रवती भवेत् ॥२३॥

कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ।
त्रैलोक्य क्षोभयत्येव त्रैलोक्यं विजयी भवेत् ॥२४॥
भूतप्रेतपिशाचाश्च राक्षसा दानवश्च ये ।
तं दृष्ट्वा प्रपलायन्ते देशाद्देशान्तरं ध्रुवम् ॥२५॥

यस्मिन् गेहे च कवचं ग्रामे वा यदि तिष्ठति ।
तं देशन्तु परित्यज प्रयान्ति चाति दूरतः ॥२६॥

**॥ इति श्री नृसिंह कवचं सम्पूर्णम् ॥**

allastrologysolutions.com